শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমন্নিগমান্তমহাদেশিকৈঃ অনুগৃহীতা

# ॥ শ্রী পরমার্থস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পরমার্থস্তুতিঃ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

শ্রীমদ্গৃধ্রসরস্তীরপারিজাতমুপাস্মহে।
যত্র তুঙ্গৈরতুঙ্গৈশ্চ প্রণতৈর্গৃহ্যতে ফলম্ ॥ **1** ॥

গুরুভিস্ত্ৱদনন্যসর্ৱভাৱৈঃ
গুণসিন্ধৌ কৃতসম্প্লৱস্ত্ৱদীযে।
রণপুঙ্গৱ ৱন্দিভাৱমিচ্ছন্
অহমস্ম্যেকমনুগ্রহাস্পদং তে ॥ **2** ॥

ভুৱনাশ্রযভূষণাস্ত্রৱর্গং
মনসি ৎৱন্ময়তাং মমাতনোতু।
ৱপুরাহৱপুঙ্গৱ ৎৱদীযং
মহিষীণামনিমেষদর্শনীযম্ ॥ **3** ॥

অভিরক্ষিতুমগ্রতঃ স্থিতং ৎৱাং
প্রণৱে পার্থ রথে চ ভাৱযন্তঃ।
অহিতপ্রশমৈরযত্নলভ্যৈঃ
কথযন্ত্যাহৱপুঙ্গৱং গুণজ্ঞাঃ ॥ **4** ॥

কমলা নিরপাযধর্মপত্নী
করুণাদ্যাঃ স্বযমৃৎৱিজো গুণাস্তে।
অৱনং শ্রযতামহীনমাদ্যং
স চ ধর্মস্ত্ৱদনন্যসেৱনীযঃ ॥ **5** ॥

কৃপণাঃ সুধিযঃ কৃপাসহাযং
শরণং ৎৱাং রণ পুঙ্গৱ প্রপন্নাঃ।
অপৱর্গনযাদনন্যভাৱাঃ
ৱরিৱস্যারসমেকমাদ্রিযন্তে॥ **6**॥

অৱধীর্য চতুর্ৱিধং পুমর্থং
ভৱদর্থে ৱিনিযুক্তজীৱিতঃ সন্।
লভতে ভৱতঃ ফলানি জন্তুঃ
নিখিলান্যত্র নিদর্শনং জটাযুঃ॥ **7**॥

শরণাগতরক্ষণব্রতী মাং
ন ৱিহাতুং রণপুঙ্গৱার্হসি ৎৱম্।
ৱিদিতং ভুৱনে ৱিভীষণো ৱা
যদি ৱা রাৱণ ইত্যুদীরিতং তে॥ **8**॥

ভুজগেন্দ্রগরুত্মদাদিলভ্যৈঃ
ৎৱদনুজ্ঞানুভৱপ্রৱাহভেদৈঃ।
স্ৱপদে রণপুঙ্গৱ স্ৱযং মে
পরিচর্যাৱিভৱৈঃ পরিষ্ক্রিযেথাঃ॥ **9**॥

ৱিমলাশযৱেঙ্কটেশজন্মা
রমণীযা রণপুঙ্গৱপ্রসাদাৎ।
অনসূযুভিরাদরেণ ভাৱ্যা
পরমার্থস্তুতিরন্ৱহং প্রপন্নৈঃ॥ **10**॥

॥ ইতি শ্রী পরমার্থস্তুতিঃ সমাপ্তা॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥